# Chitrakavitvani

# ચિત્રકવિત્વાનિ

## Document Information

Text title : chitrakavitvAni

File name : chitrakavitvAni.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, vishnu

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ચિત્રકવિત્વાનિ

તત્ર દ્વ્યક્ષરાણિ -
રસાસારસુસારોરુરસુરારિઃ સસાર સઃ ।
સંસારાસિરસૌ રાસે સુરિરંસુઃ સસારસઃ ॥ ૧॥

ચર્ચોરુરોચિરુચ્ચોરા રુચિરોઽરં ચરાચરે ।
ચૌરાચારોઽચિરાચ્ચીરં રુચા ચારુરચૂચુરત્ ॥ ૨॥

ધરે ધરાધરધરં ધારાધરધુરારુધમ્ ।
ધીરધીરારરાધાધિરોધં રાધા ધુરન્ધરમ્ ॥ ૩॥

એકાક્ષરમ્ -
નિનુન્નાનેનોનનં નૂનં નાનૂનોન્નાનનનોઽનુનીઃ ।
નાનેનાનાં નિનુન્નેનં નાનૌન્નાનાનનો નનુ ॥ ૪॥

ચક્રબન્ધઃ -
ગન્ધાકૃષ્ટગુરુન્મદાલિનિ વને હારપ્રભાતિપ્લુતં
    સમ્પુષ્ણન્તમુપસ્કૃતાધ્વનિ યમીવીચિશ્રિયો રઞ્જકમ્ ।
સદ્યસ્તુઙ્ગિતવિભ્રમં સુનિભૃતે શીતાનિલૈઃ સૌખ્યદે
    દેવં નાગભુજં સદા રસમયં તં નૌમિ કશ્ચિન્ મુદે ॥ ૫॥

સર્પબન્ધઃ -
રાસે સારઙ્ગસઙ્ઘાચિતનવનલિનપ્રાયવક્ષઃસ્થદામા
    બર્હાલઙ્કારહારસ્ફુરદમલમહારાગચિત્રે જયાય ।
ગોપાલો દાસવીથીલલિતહિતરવસ્ફારહાસઃ સ્થિરાત્મા
    નવ્યોઽજસ્રં ક્ષણોપાશ્રિતવિતતબલો વીક્ષ્ય રઙ્ગં બભાષે ॥ ૬॥

પદ્મબન્ધઃ -
કલવાક્ય સદાલોક કલોદાર મિલાવક ।
કવલાદ્યાદ્ભુતાનૂક કનૂતાભીરબાલક ॥ ૭॥

પ્રતિલોમ્યાનુલોમ્યસમમ્ -
તાયિસારધરાધારાતિભાષાતમદારિહા ।
હારિદામતયા ભાતિ રાધારાધરસાયિતા ॥ ૮॥

ગોમૂત્રિકાબન્ધઃ -
સા મલ્લરઙ્ગે રમયા ફુલ્લસારા મુદેર્ધિતા ।
શ્રમનીરધરા તુષ્ટા વલ્લવીરાસદેવતા ॥ ૯॥

મુરજબન્ધઃ -
શુભાસારસસારશ્રીઃ પ્રભાસાન્દ્રમસારભા ।
ભારસા મહસાવિત્ત તરસા રસસારિતામ્ ॥ ૧૦॥

સર્વતોભદ્રઃ -
રાસાવહા હાવસારા સા લલાસ સલાલસા ।
બલારમા મારલાવહાસમાદદમાસહા ॥ ૧૧॥

બૃહત્પદ્મબન્ધઃ -
તારપ્રસ્ફારતાલં સરભસરસલં ભાસુરાસ્યં સુભાલં
 પાપઘ્નં ગોપપાલં કરણહરકલં નીરભૃદ્ધારનીલમ્ ।
ચારુગ્રીવં રુચાલં રતમદતરલં ચેતસા પીતચેલં
 શીતપ્રસ્ફીતશીલં વરય વરબલં વાસુદેવં સુબાલમ્ ॥ ૧૨॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં ચિત્રકવિત્વાનિ સમાપ્તા ।

*Chitrakavitvani*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*